Roll No. :

कुल प्रश्नों की संख्या : 18] [कुल मुद्रित पृष्ठों की संख्या : 8
Total No. of Questions : 18] [Total No. of Printed Pages : 8

H-251090–A

विषय : संस्कृत

Subject : Sanskrit

समय : 3 घण्टे] [पूर्णांक : 75
Time : 3 hours] [Maximum Marks : 75

निर्देश : (i) सर्वे प्रश्नाः समाधेयाः।
(ii) सुन्दरं सुस्पष्टञ्च लिखत।

प्रश्न-1 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रश्नान् उत्तरत— [1×3=3]

कालान्तरे बिलासायाः विवाहः बंशी नाम्ना युवकेन सह अभवत्। बिलासा प्रतिदिनं 'चार तेन्दू' इति वन्यफलानि संग्रहणार्थं गच्छति स्म। तथा च बंशी महिषचारणाय वनं प्रति अगच्छत्। यदा सायंकाले बिलासा पत्या साकं गृहं प्रति न्यवर्तयति स्म तदा सहसा आखेटाय भ्रमतः राज्ञः कल्याणसायस्योपरि एकः व्याघ्रः आक्रमणं कृतवान्।

प्रश्नाः—

(क) "बिलासायाः विवाहः बंशी नाम्ना युवकेन सह अभवत्।" इत्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) 'गच्छति स्म' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(ग) 'भ्रमतः राज्ञः' इत्यन्योः पदयोः विशेषण पदं किम् अस्ति?

https://www.cgboardonline.com Visit CollegeDekho

प्रश्न-2 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रश्नान् उत्तरत— [1×3=3]

स्वामी आत्मानन्दः अतीव प्रतिभाशाली वक्ता लेखकश्चापि आसीत्। आध्यात्म-सम्बन्धीनां अन्य-विषयानां च प्रवचनैः सः देशे ख्यातिं लब्धवान्। तस्य द्विखण्डात्मकं 'गीता-तत्त्वचिन्तनम्' इति ग्रंथः अतीव सुमनोहरः अस्ति। धर्मदर्शनक्षेत्रे अस्य महाभागस्य कृतयः पाठकेषु वैज्ञानिकदृष्ट्यभिवृद्धिं कुर्वन्ति।

प्रश्नाः—

(क) "सः अतीव प्रतिभाशाली वक्ता लेखकश्चासीत्।" इति वाक्यस्य हिन्दी अनुवादं कुरुत।

(ख) 'प्रसिद्धम्' इत्यस्य कृते गद्यांशे किं पर्यायपदं प्रयुक्तम्?

(ग) "ग्रन्थः अतीव सुमनोहरः अस्ति।" अस्मिन् वाक्ये क्रियापदं किम्?

प्रश्न-3 अधोलिखितं श्लोकं पठित्वा निर्देशानुसारेण प्रश्नान् उत्तरत— [1×3=3]

आचार्यत्पादमादत्ते पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः॥

प्रश्नाः—

(क) "शिष्यः आचार्यात् पादम् आदत्ते" इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) 'दत्ते' इति क्रियापदस्य श्लोके किं विलोमपदं प्रयुक्तम्?

(ग) 'बुद्धया' इति पदाय श्लोके कः पर्यायः प्रयुक्तः?

प्रश्न-4 अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत— [1×3=3]

पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥

प्रश्नाः—

(क) सन्मित्रस्य एकं लक्षणं लिखतु।

(ख) "गुह्यं निगूहति" इति वाक्यस्य भावार्थं लिखत।

(ग) 'ददाति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

https://www.cgboardonline.com Visit CollegeDekho

प्रश्न-5 समासविग्रहं कृत्वा लिखत— [1×3=3]

(क) राजभयम्

(ख) उपनगरम्

(ग) चतुर्युगम्

प्रश्न-6 अधोलिखितानि वाक्यानि संशोध्य लिखत— [1×3=3]

(क) वयं भारतीया: अस्मि।

(ख) स: पुष्पं दृष्ट:।

(ग) कविभ्य: कालिदास: श्रेष्ठ:।

प्रश्न-7 निर्देशानुसारं लकार-परिवर्तनं कृत्वा लिखत— [1×3=3]

(क) बालक: हसति। (लोट्लकारे)

(ख) वयं चक्षुभ्यां पश्याम:। (लङ्लकारे)

(ग) स: गृहात् बहि: गच्छति। (लृट्लकारे)

प्रश्न-8 अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत (केषाञ्चित् चतुर्णाम्)— [1×4=4]

(क) कयो: मध्ये मित्रता अभवत्?

(ख) दीपमालिकापर्वणि कस्य शब्द: श्रूयते?

(ग) कतिधा मङ्गलयानस्य मार्ग: परिवर्तित:?

(घ) क: वंशम् आख्याति?

(ङ) केन न प्रकाशते?

(च) के रोगाणाम् अपहारका:?

https://www.cgboardonline.com

Visit CollegeDekho

प्रश्न-9 अधोलिखितेषु वाक्येषु रेखाङ्कित पदमाधृत्य प्रश्न-निर्माणं कुरुत— [1×4=4]

(क) पुत्रं द्रष्टुं सः प्रस्थितः।

(ख) प्राणेभ्यः अपि प्रियः सुहृद्।

(ग) उभौ शवं चत्वरे स्थापितवन्तौ।

(घ) तृणानाम् अग्निना सह विरोधः भवति।

अथवा

अधोलिखितानां प्रश्नानाम् उत्तराणि हिन्दीभाषया लिखत—

(क) शृगालः वधूं किं निर्देशितवान्?

(ख) वृक्षाः प्राणिनां कथम् उपकुर्वन्ति?

(ग) हेमन्तकाले किं सुखावहं भवति?

(घ) 'ओदनं सूक्तं' कस्मात् वेदात् उद्धृतः?

प्रश्न-10 स्वपाठ्यपुस्तकात् चतस्रः सूक्तयः लिखत याः अस्मिन् प्रश्नपत्रे नागताः स्युः। [1×4=4]

अथवा

अधः प्रदत्तानां सूक्तीनां हिन्दीभाषया भावार्थं लिखत—

(क) अत्यादरः शंकनीयः।

(ख) छिद्रेष्वनर्थाः बहुली भवन्ति।

(ग) समानशीलव्यसनेषु सख्यम्।

(घ) परिवारः लघु एव वरम्।

प्रश्न-11 स्वपाठ्यपुस्तकात् कौचित् द्वौ सुभाषित श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न समागतौ स्याताम्। [$2\frac{1}{2}$×2=5]

अथवा

अधः द्वौ अपूर्णौ सुभाषित श्लोकौ प्रदीयते, तौ श्लोकौ स्वपाठ्य-पुस्तकाधारेण पूरयत—

(क) वायुनां शोधकाः वृक्षाः ——।
—— रक्षणं च हितावहम्॥

(ख) उद्यमः साहसं धैर्यं, —— ।
—— देवः सहायकृत्॥

https://www.cgboardonline.com Visit CollegeDekho

प्रश्न-12 (अ) भवतः नाम राजेशः अस्ति। भवतः विद्यालयस्य नाम शासकीयः उच्चतरः माध्यमिकः विद्यालयः बिलासपुरम् अस्ति। स्वस्य अपरिहार्यं कारणात् अवकाशस्य हेतोः स्वप्राचार्यं प्रति एकम् आवेदनं पत्रं लिखतु। [1+2+1=4]

अथवा

भवतः नाम दीपेशः अस्ति। भवान् अधोलिखितां मञ्जूषां दृष्ट्वा शुल्क मुक्त्यर्थं लिखते अस्मिन् पत्रे रिक्तस्थानानि पूरयन् आवेदनं पत्रं लिखतु— [$\frac{1}{2}$×8=4]

[आशा से, पञ्चभ्यां, पञ्चसहस्त्ररूप्यकाणि, निवेदनम्, अनुग्रहीष्यति, निर्वाहः, शुल्क मुक्तये, छात्रः] https://www.cgboardonline.com

सेवायाम्

श्रीमान् प्राचार्यः महोदयः

शासकीयः उच्चतरः माध्यमिकः

विद्यालयः बिलासपुरम् (छत्तीसगढम्)

विषयः— (i) —— प्रार्थनापत्रम्।

महोदय!

सविनयं (ii) —— अस्ति। यदहं भवतः विद्यालये दशमकक्षायाः (iii) —— अस्मि। मम पिता एकः कृषकः अस्ति। तस्य मासिकः आयः (iv) —— अस्ति। मम एकः भ्राता अष्टमकक्षायां भगिनी च (v) —— कक्षायां पठति। अस्माकं कुटुम्बस्य (vi) —— अतीव काठिन्येन भवति।

अतः शुल्कमुक्त्यर्थं प्रार्थयेऽहम्। (vii) —— अत्र भवान् मम एतां प्रार्थनां स्वीकृत्य (viii) ——।

दिनाङ्कः—

भवतः विनीतः शिष्यः

दीपेशः

कक्षा-दशमी

https://www.cgboardonline.com

Visit CollegeDekho

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत— [1×4=4]

संसारे कोऽपि बालः न जानाति यत् किं सद्वृत्तं किं च असद्वृत्तम्। बालस्तु ज्येष्ठान् वृद्धान् च पश्यति। ते वयोवृद्धाः यथा-यथा आचरन्ति बालोऽपि तथैव आचरति। शिष्टानां वंशेषु वृद्धाः युवानः बालाः महिलाश्च सर्वे परस्परं सभ्यतायाः आलपन्ते ते अन्योन्यं सम्मानयन्ति। अशिष्टानां वंशेषु तु एतादृशः व्यवहारः न दृश्यते।

प्रश्नाः—

(क) संस्कृतभाषायां सारांशं लिखत।

अथवा

(क) केषां वंशेषु सर्वे सभ्यतायाः आलपन्ते ?

(ख) उचितं शीर्षकं लिखत।

अथवा

(ख) बालः कान्-कान् पश्यति ?

(ग) सदाचारणम् इत्यर्थे अत्र कः शब्दः प्रयुक्तम् ?

(घ) 'ते' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

प्रश्न-13 अधः प्रदत्तेषु विषयेषु कमपि एकमधिकृत्य संस्कृतभाषया द्वादश वाक्यैः निबन्धं लिखत—

(क) सदाचारः [$\frac{1}{2}$×12=6]

(ख) महाकविः कालिदासः

(ग) सुभाषचन्द्रः

(घ) मम प्रदेशः (छत्तीसगढः)

प्रश्न-14 निम्नलिखितयोः अङ्कयोः संस्कृतभाषया लिखत— [1×2=2]

(क) 132 (ख) 146

https://www.cgboardonline.com Visit CollegeDekho

प्रश्न-15 निम्न रेखाङ्कित पदयोः संधि-विच्छेदं कृत्वा लिखत— [1×2=2]

(क) शरीरेषु नूतनं रक्तं संचरति।

(ख) जगदीशः सर्वत्र वर्तते।

प्रश्न-16 निम्न रेखाङ्कित पदयोः प्रकृतिं प्रत्ययं च योजयित्वा लिखत— [1×2=2]

(क) अस्याः अनुज+टाप् दीप्तिः अस्ति।

(ख) शृगालः स्ना+तुमुन् तडागं गतवान्।

प्रश्न-17 यथानिर्देशं वाच्यं परिवर्तयत— [1×2=2]

(क) सञ्चालकः क्रीडति (भाववाच्ये)।

(ख) पुत्रः जनकं सेवते (कर्मवाच्ये)।

प्रश्न-18 (खण्ड-अ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(i) भाषायाः आधारभूतं भवति—

(क) काव्यम् (ख) नाटकम्

(ग) व्याकरणम् (घ) महाकाव्यम्

(ii) के न सर्वत्र भवन्ति?

(क) साधवः (ख) चन्दनम्

(ग) माणिक्यानि (घ) मौक्तिकानि

(iii) 'कविना' इति शब्दे विभक्तिः अस्ति—

(क) द्वितीया (ख) तृतीया

(ग) चतुर्थी (घ) पञ्चमी

(iv) वृक्षाः केषां शोधकाः?

(क) जलानाम् (ख) वनानाम्

(ग) गृहाणाम् (घ) वायुनाम्

https://www.cgboardonline.com Visit CollegeDekho

(v) 'किशोरी' इति पदे प्रत्यय: अस्ति—

(क) टाप् (ख) तल्

(ग) ङीप् (घ) सर्वेऽपि

प्रश्न-18 (खण्ड-ब) उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत वाक्यं पुन: लिखत— [1×5=5]

[सर्वदा, ह्य:, उपसर्ग:, आचार्यम्, पादेपम्]

(i) त्वम् अपि एकं —— आरोपय।

(ii) छात्रा: —— प्रश्नं पृच्छति।

(iii) —— अहं स्वग्रामं गतवान्।

(iv) 'विचरति' इत्यस्मिन् शब्दे 'वि' —— अस्ति।

(v) —— सत्यं वद।

प्रश्न-18 (खण्ड-स) उचितं स्तम्भं सुमेलनं कुरुत— [1×5=5]

('क' स्तम्भम्)		('ख' स्तम्भम्)
(i) स्वस्ति योगे	-	द्वितीया विभक्ति:
(ii) कामधेनुवत्	-	विसर्गलोप सन्धि(
(iii) सखिभि:	-	संस्कृतम्
(iv) 'उभयत:' योगे	-	तृतीया विभक्ति:
(v) अनेके मृगा अधावन्	-	चतुर्थी विभक्ति:

• • •

https://www.cgboardonline.com Visit CollegeDekho